नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 21

No. of Printed Pages — 7

**SS—12–2—Sans. Sah. II**

# उच्च माध्यमिक परीक्षा, 2011

# Senior Secondary Examination - 2011

**वैकल्पिक वर्ग I** ( OPTIONAL GROUP I — HUMANITIES )

## संस्कृत साहित्य — द्वितीय पत्र

## ( SANSKRIT SAHITYA — Second Paper )

समय : $3\frac{1}{4}$ घण्टे

पूर्णांक : 60

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) प्रत्येक प्रश्नस्योत्तरमुत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येक प्रश्नभागस्योत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

(5) प्रथम प्रश्नस्य चत्वारः ( i, ii, iii एवं iv ) भागाः सन्ति । प्रत्येक भागस्य उत्तरस्य चत्वारः ( **अ, ब, स** एवं **द** ) विकल्पाः सन्ति । समुचित विकल्पस्य उत्तराक्षरं उत्तर-पुस्तिकायां निम्नलिखित तालिकां निर्माय एकस्मिन् स्थाने एव लेखनीयानि ।

| प्रश्न क्रमाङ्कः | समुचित उत्तराक्षरम् |
|---|---|
| 1. (i) | |
| 1. (ii) | |
| 1. (iii) | |
| 1. (iv) | |

1. (i) वेदाङ्गेषु इदम् नास्ति —

(अ) शिक्षा (ब) कल्पः

(स) निरुक्तम् (द) उपनिषद् । $\frac{1}{2}$

(ii) भासकृतनाटकेषु महाभारतकथाश्रितं नाटकम् अस्ति —

(अ) अभिषेकनाटकम् (ब) चारूदत्तम्

(स) मध्यमव्यायोगः (द) प्रतिज्ञायौगन्धरायणम् । $\frac{1}{2}$

(iii) शिवराज विजयस्य सम्पूर्णा कथा निःश्वासेषु समाहिता अस्ति —

(अ) त्रिषु (ब) अष्टषु

(स) पञ्चषु (द) चतुर्षु । $\frac{1}{2}$

(iv) 15 वर्षीये लघ्वस्थायामेव अनेन 'शिव-पुष्पाञ्जलिः' नामकं स्तोत्रं रचितम् —

(अ) कलानाथ शास्त्रिणा (ब) पं० विद्याधर शास्त्रिणा

(स) प्रभाकर शास्त्रिणा (द) मधुकर शास्त्रिणा । $\frac{1}{2}$

2. 'अचो रहाभ्यां द्वे' इत्यनेन सूत्रेण कस्य द्वित्वं भवति ? 1

3. दूरतः सम्बोधनदशायां वाक्यस्य 'टि' संज्ञकः भागः विकल्पेन प्लुतः केन सूत्रेण भवति ? 1

4. सोदाहरणं व्याख्या कार्या — 3

'उपसर्गाः क्रियायोगे' **अथवा** 'पूर्वत्रासिद्धम्' ।

5. अधोलिखित-पदयोः प्रमुखसूत्रनिर्देशपूर्वकं रूपसिद्धिः क्रियताम् — $2\frac{1}{2} + 2\frac{1}{2} = 5$

(i) गङ्गौघः **अथवा** सुखार्तः

(ii) गवेन्द्रः **अथवा** शिवेहि ।

6. अपाये अर्थे का विभक्तिः भवति ? 1

7. अधोलिखितेषु रेखांकितपदेषु प्रयुक्त विभक्त्या: विधायकं सूत्रं वार्तिकं वा लिखत — 1 + 1 + 1 = 3

(i) <u>मुक्तये</u> हरिं भजति ।

(ii) <u>मासेन</u> अधीत: ग्रन्थ: ।

(iii) <u>कवीनां</u> कालिदास: श्रेष्ठ: ।

8. अधोलिखितसूत्रस्य सोदाहरणं व्याख्या करणीया — 2

'हेतौ' **अथवा** 'आख्यातोपयोगे' ।

9. अधोलिखितेषु अशुद्धवाक्येषु **द्वे** वाक्ये शुद्धं कृत्वा लिखत — 1 + 1 = 2

(i) सा स्त्री चोरेण बिभेति ।

(ii) दैत्येषु हरि: अलम् ।

(iii) तव जनकं नम: ।

10. अधोलिखितेषु **द्वयो:** पदयो: संस्कृते वाक्यरचनां कुरुत — 1 + 1 = 2

(i) वषट्

(ii) स्पृह्यति

(iii) अध्यास्ते ।

11. कां आवश्यकतां पूरयितुं कल्पसूत्राणां रचना जाता ? 1

12. राज्ञ: दुष्यन्तस्य शकुन्तलया सह सुखदं पुनर्मिलनं अभिज्ञानशाकुन्तलस्य कस्मिन् अङ्के भवति ? 1

13. क: गद्य-ग्रन्थ: पित्रा आरब्ध: पुत्रेण च पूरित: ? 1

14. कस्य काव्योपरि पं० गुलाबचन्द्रचूलेट: 'माघ' पुरस्कारेण विभूषित: ? 1

15. श्रीपद्मदत्त ओझा साम्यवादेन प्रभावित: भूत्वा किम् ऐतिहासिकं महाकाव्यम् अरचयत् ? 1

16. अधोलिखितेषु कस्यापि एकस्य व्यक्तित्वं कृतित्वञ्च संक्षेपेण लिखत — 3

(i) आचार्य मधुकरशास्त्री

(ii) श्रीकृष्णरामभट्टः

(iii) श्रीनवलकिशोर शास्त्री कांकरः ।

**अथवा**

अधोलिखितरचनानां लेखकानां नामानि लेखनीयानि —

(i) इन्द्रविजयः

(ii) प्रतिवेशिनीकथा

(iii) उद्योगलहरी

(iv) आषाढस्य प्रथमदिवसे

(v) वैदिक विज्ञानम्

(vi) दशकण्ठवधम् ।

17. अधोलिखितेषु **द्वयोः** गद्यांशयोः हिन्दीभाषायाम् आंग्लभाषायां वा व्याख्या कार्या—

( 1 + 3 ) + ( 1 + 3 ) = 8

(क) ॐ वाङ् मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरावीर्म एधि । वेदस्य म आणीस्थः श्रुतं मे मा प्रहासीः । अनेनाधीतेनाहोरात्रान्संदधाम्यृतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु मामवतु वक्तारमवतु वक्तारम् ।

**अथवा**

अथ तस्य प्रियसखो मकरन्दो नाम कथमपि लब्धप्रवेशः कन्दर्पसायक प्रहारविवशं कन्दर्पकेतुम् उवाच - सखे ! किम् इदम् असाम्प्रतम् असाधुजनोचितम् आश्रितोऽस्ति । तवैतदालोक्य चरितं वितर्कदोलासु निवसन्ति सन्ति । खलाः पुनः तत्तद् अनिष्टोद्भावनरसोत्तरं खलहृदयं भवति ।

(ख) ततो राजाऽपि खड्गमादाय तदनुसरणक्रमेण नगराद् बहिर्जगाम । गत्वा च वीरवरेण रुदती रूपयौवनसम्पन्ना सर्वालंकारभूषिता काचित् स्त्री दृष्टा, पृष्टा च – 'का त्वम् , किमर्थं रोदिषि ? इति । स्त्र्योक्तम् – अहम् एतस्य राज्ञो राजलक्ष्मीः, चिरादेतस्य भुजच्छायायां महता सुखेन विश्रान्ता इदानीमन्यत्र गमिष्यामि ।

**अथवा**

संन्यासिन् ! संन्यासिन् ! बहूक्तम् , विरम । न वयं दौवारिकाः ब्रह्मणोऽप्याज्ञां प्रतीक्षामहे किन्तु यो वैदिकधर्मरक्षाव्रती, यश्च संन्यासिनां ब्रह्मचारिणां तपस्विनाञ्च संन्यासस्य ब्रह्मचर्यस्य तपसश्चान्तरायाणां हन्ता, येन च वीर-प्रसविनी इयम् उच्यते कोङ्कणदेशभूमिः, तस्यैव महाराजशिववीरस्याज्ञां वयं शिरसा वहामः ।

18. अधोलिखितेषु **द्वयोः** गद्यांशयोः सप्रसङ्गं संस्कृते व्याख्या कार्या— ( 3 + 1 ) + ( 3 + 1 ) = 8

(क) एकस्मिन्नहनि महीपतिः अयशोलेखां द्रष्टुं तत्प्रासादमाजगाम । सा च किमपि वक्तुकामापि लज्जावशात् मौनं दधौ । राजा तां प्रपच्छ – वल्लभे ! निश्शंकं वद यत् किमपि निगदितुमिच्छसि । सा प्राह-देव ! सत्यं कटु भवतीति । तत्प्रकथनात् बिभेति मे हृदयम् । अभयदानं चेद् दीयते तर्हि वच्मि ।

**अथवा**

ततः निखिलमपि नगरं विलोक्य कम् अपि मूर्खम् अमात्यः न अपश्यत् , यं निरस्य विदुषे गृहं दीयते । स तत्र सर्वत्र भ्रमन् कस्यचित् कुविन्दस्य गृहं वीक्ष्य कुविन्दं प्राह – 'कुविन्द ! गृहात् निःसर । तव गृहं विद्वान् एष्यति' इति ।

(ख) भाग्य विधात्रा यल्लिखितं तन्मार्जितुं कः क्षमः ? इतः चेसप्पा शनैः शनैः ससंज्ञः सञ्जातः । उत्थितुमपि चाक्षमोऽयम् अजापालकैः समुत्थापितः । तस्य दुर्दशां वीक्ष्य तेऽपि दुःखिताः सञ्जाताः । ते चेसप्पां सर्वं वृत्तान्तमपृच्छन् परं चेसप्पा ''सर्वं भाग्याधीनं वर्तत'' इति कथयामास ।

**अथवा**

अनेन ज्ञायते यत् श्रद्धया विनयेन श्रेयसाम् अभिवादनेन च नरः सर्वत्र सिद्धिं समधिगच्छति । हन्त, अन्धानुकरणशीलेऽस्मिन् युगे शनैः शनैः सद्गुणास्तु अस्माभिरुपेक्ष्यन्ते । बालकाः विद्यालयेषु प्रथमदर्शने 'हाय' इति शब्देन परस्परम् अभिवादयन्ति, श्रेष्ठानां ज्येष्ठानां च चरणवन्दना तु दूरे जाता ।

19. अधोलिखितेषु केषाञ्चित् **चतुर्णां** प्रश्नानाम् उत्तराणि संस्कृते लेखनीयानि — $4 \times 1 = 4$

(i) 'कण्टकेनैव कण्टकम्' सूक्तिरियम् पाठ्युस्तकस्य किं नाम्नि पाठे अस्ति ?

(ii) नेत्रदानेन चकितेन्द्रः राज्ञे किम् अदात् ?

(iii) केन परितुष्टः शक्तिकुमारः कन्यां स्वगृहं नीतवान् ?

(iv) कीदृशाः जनाः ''गुरूपदेशः'' पाठानुसारेण उपदेशानां भाजनानि भवन्ति ?

(v) नवनवतिराज्ञीषु अतुलरूपवती कनिष्ठा च का राज्ञी आसीत् ?

(vi) 'अपूर्वोऽयमात्मविश्वासः' पाठानुसारेण केन भोजनेन नृपतिः परां तृप्तिं आनन्दं चान्वभवत् ?

(vii) कपोत्याः दयनीया-स्थितिं दृष्ट्वा मृगयुः कां प्रतिज्ञाम् अकरोत् ?

(viii) 'संयमः खलु जीवनम्' पाठानुसारेण सर्वासां विपदानां मूलकारणं कि अस्ति ?

20. अधोलिखितेषु कस्यचिदेकस्य विषयोपरि संस्कृतभाषायां दशवाक्यानां लघुलेखः लेख्यः — 4

(i) शैक्षिक-भ्रमणम्

(ii) धर्मो रक्षति रक्षतः

(iii) सर्वं प्रियं चारुतरं वसन्ते ।

21. अधोलिखितेषु कस्यचिदेकस्योपरि संस्कृते पञ्चसप्ततिः शब्दात्मकः लेखः लेखनीयः — 6

(i) एकतायाः महत्त्वम्

(ii) सर्वे गुणाः काञ्चनमाश्रयन्ति

(iii) उद्योगस्य महिमा ।